निवसतिः, स्त्री, ( निवसन्त्यत्रेति । नि+वस्+ "वहिवस्यर्त्तिभ्यश्चित् ।" उणा० ४ । ६० । इति अतिच् ।) गृहम् । इति शब्दरत्नावली ॥

निवसथः, पुं, ( निवसन्त्यत्रेति । नि+वस् आधारे अथच् ।) ग्रामः । इति हेमचन्द्रः । ४ । ३३ ॥

निवसनं, क्ली, ( न्युष्यतेऽत्र । नि+वस्+आधारे ल्युट् ।) गृहम् । इति शब्दरत्नावली ॥ वस्त्रम् । इति हलायुधः ॥ (यथा, गोः रामायणे ।२।३७।
"द्वितीयं च परीदध्यौ चीरमादाय मैथिली ।
चीरस्याकुशला देवी सम्भ्रमिवसने शुभा ॥")

निवहः, पुं, ( नितरामुह्यते इति । नि+वह+ पुंसीति घः ।) समूहः । इत्यमरः । ९ । ५ । ३८ ॥ (यथा, पञ्चतन्त्रे । ५ । ८ ।
"सकुलं कुशलं सुजनं
विहाय कुलकुशलशीलविकलेऽपि ।
आढ्ये कल्पतराविव
नित्यं रज्यन्ति जननिवहाः ॥"
नितरां वहतीति । नि+वह+पचाद्यच् । ) सप्तवायुमार्गगतवायुविशेषः । यथा,—
"निवहो यत्र वातीशः केषाञ्चित्र सुखप्रदः ।
न प्रचण्डो न च स्वड्ः प्रमादी च प्रभञ्जनः ॥"
इति ज्योतिषम् ॥

निवातः, त्रि, ( नितरां वाति गच्छत्यत्र । नि+वा +अधिकरणे क्तः ।) आश्रयः । निवासः । (निवृत्तो वातो यस्मिन् ।) अवातः । वातशून्यः । ( यथा, रघुवंशे । ३ । १७ ।
"निवातपद्मस्तिमितेन चक्षुषा
नृपस्य कान्तं पिबतः सुताननम् ।
महोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव नात्मनि ॥" )
शस्त्राभेद्यं वर्म्म । शस्त्रेण न भिद्यते यत् वर्म्म कवचम् । इत्यमरभरतौ । ३ । ३ । ८४ ॥

निवातकवचः, पुं, दैत्यविशेषः । स तु हिरण्यकशिपोः पौत्रः संह्रादपुत्रः । इत्यग्निपुराणम् ॥ ( निवातं शस्त्राभेद्यं कवचं येषामिति । दानवविशेषे, पुंलिङ्गो बहुवचनान्तः । ते तु इन्द्रादिष्टेनार्ज्जुनेन निहताः । यथा, महाभारते । ३ । १६८ । ७०—७२ ।
"ततो मामब्रवीद्राजन् ! प्रहस्य बलवृत्रहा ।
नाविषह्यन्तवास्तीति त्रिषु लोकेषु किञ्चन ॥
निवातकवचा नाम दानवा देवशत्रवः ।
समुद्रकुक्षिमाश्रित्य दुर्गे प्रतिवसन्त्युत ॥
तिस्रः कोट्यः समाख्याता तुल्यरूपबलप्रभाः ।
तांस्तत्र जहि कौन्तेय ! गुरुर्य्येस्ते भविष्यति ॥"
एतद्विवरणविस्तृतिस्तु तत्रैव विशेषतो द्रष्टव्या ॥)

निवापः, पुं, (नितरामुप्यते इति । नि+वप+घञ् ।) स्वतोद्देश्यकदानम् । तत्पर्य्यायः । पितृदानम् २ । इत्यमरः ।२।७।३१॥ पितृतर्पणम् ३ । इति हेमचन्द्रः ।३। ४० ॥ निवपनम् ४ पितृदानकम् ५ । इति शब्दरत्नावली ॥ ( यथा, रघुवंशे ।८। ८६।
"अपशोकमनाः कुटुम्बिनी-
मनुगृह्णीष्व निवापदत्तिभिः ॥")
दानमात्रम् । यथा । "येभ्यो निवापाञ्जलयः पितृणाम् ।" इति भरतः ॥ ( न्युप्यते बीजमस्मिन्निति । क्षेत्रम् । इति नीलकण्ठः ॥ यथा, महाभारते । ३ । १०६ । ६ ।
"अथर्निं प्रमदा गाश्च निवापं बहुवार्षिकम् ।
तत्ते विप्र ! प्रदास्यामि न तु वर्म्मे सकुण्डलम् ॥"

निवारः, पुं, निवारणम् । इति निपूर्व्ववृधातोर्भावे घञ्प्रत्ययनिष्पन्नः ॥

निवारणं, क्ली, (नि+वृ+णिच्+करणे ल्युट् ।) निश्चयेन वारणम् । निराकरणम् । यथा,—
"यद्यावती धर्म्म इतीतरस्थितो
न मन्यते तस्य निवारणं जनः ।"
इति श्रीभागवते प्रथमस्कन्धः ॥

निवारितः, त्रि, ( नि+वृ+णिच्+क्तः । ) कृतनिवारणः । यथा,—
"निवारितास्तेन महीतलेऽखिले
निरीतिभावं गमितेऽतिवृष्टयः ॥"
इति नैषधे । १ । ९१ ॥

निवास, त क कृत्याम् । इति कविकल्पद्रुमः ॥ ( अदन्त चुरा-परं-सकं-सेट् । ) अनिनिवासत् । कृतिराच्छादनम् । निवासयति यश्चित्रं चीनांशुकमिति हलायुधः । इति दुर्गादासः ॥

निवासः, पुं, ( निवसति अस्मिन् । नि+वस्+ अधिकरणे घञ् । ) गृहम् । इति हेमचन्द्रः । ४ । ५७ ॥ ( यथा, विष्णुपुराणे ।१।१३।८४ ।
"तत्र तत्र प्रजानां हि निवासं समरोचयत् ॥"
आश्रयस्थानम् । यथा, भागवते । १ । ११ । २७ ।
"श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम् ।
बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम् ॥"
वस्त्रम् । यथा, हरिवंशे । १८१ । ७८ ।
"नमश्चर्म्मनिवासाय नमस्ते पीतवाससे ॥"
भावे घञ् । वासः । यथा, महाभारते । १ । १८६ । ६ ।
"कुम्भकारस्य शालायां निवासं चक्रिरे तदा ॥")

निवासी, [ न् ] त्रि, ( निवसतीति । नि+वस्+ णिनि ।) निवासविशिष्टः । निवासकर्त्ता । यथा,—
"ते तु कासरमश्नन्ति देवरः पतिवत्कथं ।
धन्याः कालीनदीतीरे काम्यकुञ्जनिवासिनः ॥"
इति काव्योदयः ॥

निविड़ं, त्रि, ( नितरां विड़तीति । नि+विड़ आक्रोशे+क । ) निरवकाशम् । तत्पर्य्यायः । निरन्तरम् २ निबिरीषम् ३ घनम् ४ सान्द्रम् ५ नीरन्ध्रम् ६ बहुलम् ७ दृढम् ८ गाढम् ९ अविरलम् १० । इति हेमचन्द्रः ।६ । ८२ ॥ ( यथा, आर्य्यासप्तशत्याम् । ३२० ।
"निविड़घटितोरुयुगलां श्वासोत्कम्पस्तनार्पित-
वसनाम् ॥"
यथा, च रघुवंशे । ६ । ५८ ।
"तस्यापरेष्वपि मृगेषु शरान् मुमुक्षोः
कर्णान्तमेत्य बिभिदे निविड़ोऽपि मुष्टिः ॥"
नासिकाया नतम् । नि+"नेर्विड्बिरीसचौ ।" ५ । २ । ३२ । इति विड़च् । अवटीटम् । "तद्योगात् नासिका निविड़ा ।" इति सिद्धान्तकौमुदी ॥ )

निविरीसं, त्रि, ( नि नता नासिका यस्य । "नेर्विड्बिरीसचौ ।" ५ । २ । ३२ । इति बिरीसच् । अवटीटः । इति व्याकरणम् ॥ ) निविड़म् । इति जटाधरः ॥ ( यथा, माघे ।७।२०।
"उरुनिविरीसनितम्बभारखेदि ॥" )

निविष्टं, त्रि, ( नि+विश+क्तः । ) निवेशयुक्तम् । ( यथा, कुमारसम्भवे । ५ । ३१ ।
"भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्व्विशेषेष्वतिगौरवाः क्रियाः ॥")
आविष्टम् । प्रविष्टम् । यथा,—
"उडुगणपरिवारो नायकोऽप्योषधीना-
मम्हतमयशरीरः कान्तियुक्तोऽपि चन्द्रः ।
भवति विकलमूर्त्तिर्मण्डलं प्राप्य भानोः
परसदननिविष्टः को लघुत्वं न याति ॥"
इत्युद्भटः ॥
(आबद्धम् । यथा, देवीभागवते ।१।१५।४५।
"अहोऽहमिति मे बुद्धिर्नाशमेति पिसतः ।
संसारवासनाजाले निविड़ा दृढगामिनी ॥"
स्थितम् । यथा, रामायणे । १ । ५ । ५ ।
"कोशलो नाम मुदितः स्फीतो जनपदो महान् ।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ॥" )

निवीतं, त्रि, ( निवीयते स्मेति । नि+वी आच्छादने+क्तः । सम्प्रसारणम् । ) आच्छादनवस्त्रम् । उड़नी इति भाषा ॥ तत्पर्य्यायः । प्रावृतम् २ । कण्ठलम्बितयज्ञसूत्रे, क्ली । इत्यमरः । १ । ७ । ५० ॥ यथा,—
"उपवीतं भवेन्नित्यं निवीतं कण्ठसज्जनम् ॥"
इति कूर्म्मपुराणम् ॥

निवीती, [ न् ] पुं, ( निवीतमस्यास्तीति । ) निवीतयुक्तः । कण्ठलम्बितयज्ञसूत्रविशिष्टः । यथा,—
"हतोपवीती देवेभ्यो निवीती च भवेत्ततः ।
मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रानृषींस्तथा ॥"
इत्याह्निकतत्त्वम् ॥

निवृतं, त्रि, ( निव्रियते आच्छाद्यते स्मेति । नि+ वृ+क्तः । ) निवीतम् । उड़नी इति भाषा ॥ इत्यमरटीकायां स्वामी ॥ परिवेष्टितम् । इति हेमचन्द्रः ॥

निवृत्तः, त्रि, ( नि+वृत्+क्तः । ) निवृत्तिविशिष्टः । विरतः । यथा, श्रीभागवते ।१०।१।४।
"निवृत्ततर्षैरुपगीयमाना-
द्भवौषधाच्छ्रोत्रमनोऽभिरामात् ।
क उत्तमश्लोकगुणानुवादात्
पुमान् विरज्येत विना पशुघ्नात् ॥"

निवृत्तात्मा, [ न् ] पुं, ( शरीरबन्धनात् निवृत्त आत्मा स्वरूपं यस्येति । ) विष्णुः । ( यथा, महाभारते । १३ । १४९ । १८ ।
"आवर्त्तनो निवृत्तात्मा संवृतः संप्रमर्द्दनः ॥")

निवृत्तिः, स्त्री, ( नि+वृत्+क्तिन् । ) निर्वृतिः । अप्रवृत्तिः । तत्पर्य्यायः । उपरमः २ विरतिः ३